प्रवर्तते ततो देहादन्योऽज्ञो भ्रान्तिमाश्रितः ।
आत्मा शास्त्राधिकारी स्यात् स हि संसारविभ्रमात्[1] ॥ १० ॥
तस्मिन्नात्मनि मोहेन बन्धमोक्षौ प्रकल्पितौ ।
शास्त्रमापाततो भाति मुने बहुमुखं नृणाम् ॥ ११ ॥
निरूपिते[2] तु न्यायेन विभात्येकमुखं पुनः ।
शास्त्रनिर्णायकं न्यायकलापं मुनिसत्तम ॥ १२ ॥
सूत्ररूपेण कुर्वन्ति शिवस्यैवाज्ञयैव तु ।
अल्पाक्षरमसन्दिग्धं[3] सारवद् विश्वतो मुखम् ॥ १३ ॥
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।
मुनयश्च मनुष्याश्च प्रसादादेव शूलिनः ॥ १४ ॥
सूत्रार्थं भाष्यरूपेण यथावद् दर्शयन्ति च ।
सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ॥ १५ ॥
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।
प्रसादादेव रुद्रस्य भवानीसहितस्य तु ॥ १६ ॥
कुर्वन्ति केचिद् व्याख्यानं भाष्यस्यैव तपोबलात् ।
पदच्छेदः पदार्थोक्तिर्विग्रहो[4] वाक्ययोजना ॥ १७ ॥
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ।
केचिद् वार्तिकरूपेण भाष्यार्थं कथयन्ति च ॥ १८ ॥
प्रसादादेव रुद्रस्य पूर्वे पूर्वतपोबलात् ।
उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ॥ १९ ॥
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः ।
स्वबुद्ध्यधीनं भाष्यार्थं सङ्ग्रहेणैव चाथवा[5] ॥ २० ॥
विस्तरेण प्रकुर्वन्ति केचित् प्रकरणात्मना ।

---

१. ङ च संसरति भ्रमात्, २. क निरूपितोक्तन्यायेन, ३. ङ स्वल्पा, ४. ख ग पदार्थश्च, ५. ग वाथवा, ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ॥ २१ ॥

आहुः[1] प्रकरणं नाम शास्त्रभेदविचक्षणाः ।
सूत्रभाष्यादिभिः शास्त्रं साक्षाद् वेदनसाधनम् ॥ २२ ॥

श्रोतव्यं स्वगुरोः स्वात्मस्वरूपप्रतिपत्तये ।
आत्मलाभात् परं[2] नास्ति किञ्चिन्मात्रमपि द्विज ॥ २३ ॥

अतः स्वात्मानमीशानं लभते स्वात्मना स्वयम् ।
लब्धस्य[3] लाभो लब्धः स्यादलब्धस्य तथैव हि ॥ २४ ॥

द्विधा[4] लाभः स्वकं रूपं तत्र लब्धं हि सन्ततम् ।
लब्धस्यालब्धताज्ञानाल्लाभस्तस्यैव वेदनात् ॥ २५ ॥

आत्मलाभः स्वतः स्वात्मवेदनोत्पत्तिरेव हि ।
स्वात्मलाभनिमित्तं यद् बन्धनं पुरुषस्य तत् ॥ २६ ॥

स्वात्मलाभेन नष्टं[5] स्यात् स्वात्ममात्रतयैव[6] तु ।
स्वात्ममात्रतया नष्टं स्वात्मनो[7] नैव बन्धनम् ॥ २७ ॥

अस्ति स्वात्मैव नैवान्यद्[8] वस्तुतत्त्वनिरूपणे ।
व्यावहारिकदृष्ट्यैव[9] विभाति स्वात्मनः पृथक् ॥ २८ ॥

समस्तं व्याप्तभावत्वाद् भावः स्वात्मैव केवलम्[10] ।
स्वस्वरूपस्य लाभेन स्वात्मानन्दो महत्तमः ॥ २९ ॥

अपरोक्षतया भाति सा परा मुक्तिरात्मनः ।
आत्मा नाम जडस्यास्य [11]प्रकाशस्य प्रकाशकः ॥ ३० ॥

---

१. च प्राहुः, २. च परो,
३. ग घ लब्धस्य लाभो लब्धस्य लब्धव्यस्य तथैव हि,
ङ च ,, ,, ,, ,, च, ४. क विद्या ।
५. क दृष्टः, ६. क आत्ममात्रं तथैव च, ७. क ह्यात्मनो, ८. ख नैवान्य, ९. क व्यवहारैकदृष्ट्वैव, १०. ग स्वात्मैक्य, ११. च प्रकाश्यस्य ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सूत्रादिभिश्चैषां प्रणयनम् । तत्र सूत्रणात् सूत्रम् । यदाहुः—

“अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रकृतो विदुः ॥”

सूत्राणां सकलसारविवरणं वृत्तिः । सूत्रवृत्तिविवेचनं पद्धतिः । आक्षिप्य भाषणाद्भाष्यम् । अन्तर्भाष्यं समीक्षा । अवान्तरार्थविच्छेदश्च सा । यथासम्भवमर्थस्य टीकनं टीका । विषमपदभञ्जिका पञ्जिका । अर्थप्रदर्शनकारिका कारिका । उक्तानुक्तदुरुक्तचिन्ता वार्त्तिकमिति शास्त्रभेदाः ।

“भवति प्रथयन्नर्थं लीनं समभिप्लुतं स्फुटीकुर्वन् ।
अल्पमनल्पं रचयन्ननल्पमल्पं च शास्त्रकविः ॥”

शास्त्रैकदेशस्य प्रक्रिया प्रकरणम् । अध्यायादयस्त्ववान्तरविच्छेदा[1]ः कृतिभिः स्वतन्त्रतया प्रणीता इत्यपरिसङ्ख्येया अनाख्येयाश्च । शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या । उपविद्यास्तु चतुःषष्टिः । ताश्च कला इति विदग्धवादः । स आजीवः काव्यस्य । तमौपनिषदिके वक्ष्यामः ।

इत्यनन्तोऽभियुक्तानामत्र संरम्भविस्तरः ।
त्यक्तो निपुणधीगम्यो ग्रन्थगौरवकारणात् ॥

इति राजशेखरकृतौ काव्यमीमांसायां कविरहस्ये प्रथमेऽधिकरणे
द्वितीयोऽध्यायः शास्त्रनिर्देशः ॥

## तृतीयोऽध्यायः काव्यपुरुषोत्पत्तिः ।

एवं गुरुभ्यो गिरः पुण्याः पुराणीः शृणुमः स्म, यत्किल धिषणं शिष्याः कथाप्रसङ्गे पप्रच्छुः, कीदृशः पुनरसौ सारस्वतेयः काव्यपुरुषो वो गुरुः ? इति । स तान् बृहताम्पतिरूचे ।

पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास । प्रीतेन मनसा

---

१ B विच्छेदः.

two more systems of philosophy and by distributing them into two groups पूर्वपक्ष and उत्तरपक्ष. The philosophy of the Jains, Buddhists and Cārvākas is included in the former while that of the Sāṅkhya, Nyāya and Vaiśeṣika is taken up in the latter. These six schools are called by the single name of Tarka. Gautama defines Tarka in his Nyāyasūtra as अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः । (1-1-40.). As these six schools of philosophy try to discover the real nature of the universe, soul, body and other connected objects, they are collectively known as Tarka. This Tarka is based on three varieties of arguments in order to decide the truth or otherwise of a statement. These arguments are commonly known as Kathā which consists of three members: वाद, जल्प and वितण्डा । (*see* Vātsyāyanabhāṣya on Gautama (1. 2. 1-3) for the definitions of Vāda, etc.)

l. 25. Here the author while generally defining the S'āstras shows also the correct method of their composition. In the course of his definition, he mentions that the S'āstras were originally composed in the form of Sūtras; commentaries and explanations then followed, and the S'āstras expanded just as the rivers expand in the course of their progress.

## Page. 5.

l. 1. सूत्रणात् । The root sūtra means वेष्टन or that which encircles. A Sūtra, indeed, encircles or includes many things within a short space. Similarly, S'āstric Sūtras also are concise technical sentences which express the maximum idea in the minimum of space.

l. 2. The well-known and the most popular definition of Sūtra is given in this verse. *Cf.* Vāyupurāṇa 59, 142. There is another definition which also deserves to be cited in this connection:—

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥

l. 3. अस्तोभम् । The word स्तोभ signifies a letter or a group of letters which serves no purpose in making out the sense of a sentence and is, therefore, considered redundant. Such words are very common in the Sāmaveda. The letters हुं, फट् etc. are examples of स्तोभ. In Sūtras all redundant letters should be eschewed.

l. 4. Vṛtti is the first concise commentary on the Sūtras. In all Darśanas, or sciences, for instance, the Vṛttis generally precede the more comprehensive Bhāṣyas.

l. 5. In the Bhāṣyas, the authors spontaneously raise points of objection in the succeeding portions which seem to militate against the views expressed in the preceding portions of their own text. This is what is known as आक्षिप्य भाषणाद्धाप्यम् ।

समीक्षा । This word seems to have been used here in the sense of परीक्षा. Generally there are three divisions in the Bhāṣyas i. e. उद्देश, लक्षण and परीक्षा. The Nyāyasūtra and its Bhāṣya deal with the परीक्षा portion in a more comprehensive manner than the other philosophical works.

l. 6. A concise commentary on Sūtras or Bhāṣyas is called a टीका. The टुप्टीका of Kumārilabhaṭṭa may be cited as an instance where the commentator only touches the very important points of the Sūtra and the Bhāṣya of the Mīmāṁsāśāstra. Brevity of this टीका will be apparent when it is compared with the other works of his, which are designated by him as the Vārttikas, on the S'ābara-bhāṣya.

l. 9. After describing the different divisions of the S'āstras, the author here relates the function of a poet who endeavours to compose verses on S'āstric subjects. The S'lokavārttika of Kumārila, the Saṅgraha of Vyāḍi and the Vākyapadīya of Bhartṛhari may be taken as illustrative of the qualities of a S'āstrakavi. For further information regarding the S'āstrakavi and his abilities when compared to those of a Kāvyakavi, *see* p. 17. ll. 5–17 of this work.

l. 11. The treatises dealt with above follow the methods of the original Sūtra works and commentaries thereon. But the Prakaraṇa works which appear to be independent treatises introduce only the chief subjects of a S'āstra in order to make the student better fitted for prosecuting higher studies in that S'āstra.

l. 13. S'āhitya which is the fifth Vidyā in the Rājaśekhara's scheme of enumeration is defined in this sentence. For the explanation of the phrase यथावत् सहभाव *see* Bhoja's definition of

Ṣāhitya in his S'ṛṅgāraprakāśa ( VII ) where it is explained in the following words:—

तत्राभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभावदोषहानगुणोपादानालङ्कारयोगर-सावियोगरूपाः शब्दार्थयोर्द्वादश संबन्धाः साहित्यमित्युच्यते ॥

Following this statement of Bhoja, S'āradātanaya in his Bhāvaprakāśana ( p. 145. ll. 6–12 ) defines Sāhitya and gives several illustrations. The twelve varieties of relation between the S'abda and its Artha as described in the above quotation from Bhoja are probably indicated by Rajaśekhara in the phrase, यथावत्सहभावेन विद्या. It may also be remembered here that Kālidāsa makes a mention of this Sāhitya of S'abda and Artha in the beginning of his Raghuvaṁśa.

* [ l. 14 For the 64 kalās *see* कामसूत्र 1–3–16 ]

l. 14. 64 Upavidyās are enumerated by Vātsyāyana in his Kāmasūtra 1–3–16. Another set of 64 Aṅgas of the Pāñcālas also is mentioned in the above work to complete the सांप्रयोगिकाधिकरण of the Kāmasūtra. Vātsyāyana himself calls these Upavidyās by the common name of Kalā in his Kāmasūtra ( 2–2–3. )

आजीवः=livelihood. These Kalās are introduced as a matter of necessity in the best Kāvyas, and, therefore, it is necessary that poets should be well conversant with these subjects.

l. 15. The last Adhikaraṇa of the Kāvyamīmāṁsā is called औपनिषदिक where directions are given for obtaining poetical excellance through magical practices, such as the practice of Mantras and Tāntric rites. This statement also indicates that Rājaśekhara wanted to complete the present work in eighteen Adhikaraṇas.

## Adhyāya. III.

l. 20 काव्यपुरुषोत्पत्तिः । In this chapter the author traces the origin of metrical composition, gives an account of its subsequent developments in a chronological order, and makes an endeavour to connect them with the customs and manners prevalent in the different parts of India. And in doing so, he travels beyond the range of history to mythology and traces the origin of poetry from an imaginery Kāvyapuruṣa who is supposed to be the embodiment of the whole classical literature.